श्रीसहजानंदायनमोनमः॥ अथतस्मात्जीर्णदुर्गप्रयाणादिवर्णयितुमुपक्रमते चारुदुर्गनगरादिति अथजी
र्णदुर्गप्रयाणेच्छानंतरं सः श्रीहरिः हयमश्वम् अधिरुह्य त्वलिताः प्रकाशमानायेकुंतास्तेकराग्रेषुयेषांते
तथोक्तैः सादिभिरश्ववारैः पत्तिभिः पदातिभिश्चमुनिवृंदैर्मुनिसमूहैश्चगृहिगणैर्गृहस्थभक्तसमूहैश्चसार्धंचा
रुरमणीयंयत्दुर्गनगरंतस्मान्निर्ययौनिर्जगामस्वागतावृत्तंलक्षणंतूक्तंप्राक्॥१॥ अश्ववारेति अश्ववारस्य

युग्मम्चारुदुर्गनगरादथसार्धंसादिभिर्ज्वलितकुंतकराग्रैः॥ निर्ययौगृहिगणैर्मुनिवृंदैःपत्तिभिःसमधिरुह्यहयं
सः॥१॥ अश्ववारवरवेषमनोज्ञःस्वर्णरत्नमणिभूषणशाली॥ उज्ज्वलस्ववरवीरवरराजिराजितारुणशिरःपटरम्यः
२॥ हस्तिनोवनकृतानुवितानानीरराशिमिवहंससमूहाः॥ मानसंसरइवास्तलुरक्तादुद्रुवुस्तममुभक्तजनौघाः
३॥ सादिनोयोवरउल्लसोवेषशोभनेपथ्यंतेनमनोज्ञोरमणीयस्तथोक्तः स्वर्णंचरत्नानिचमणयश्चतेषांभूषणा
निमंडनानितैःशालीशोभमानस्तथोक्तः उज्ज्वलंतोहयगमनवेगेनोत्सूसरंतःप्रवराअतिश्रेष्ठायेवीरवरा
आपीडास्तेषांराजिःपंक्तिस्तयाराजितःशोभमानोऽरुणोरक्तोयःशिरपटउष्णीषस्तेनरम्योमनोहरःशो
रवराणांश्रेष्ठत्वंतुभगवदंगीकारेणमुक्तिधामाभिप्रायम्॥३॥ हस्तिनइतिवनस्पयःकृशानुरग्निर्दावानल ॥१॥

इतियावत्तेनवितोषेणतप्ताःहस्तिनोगजाःनीरराशिंजलसमूहमिवहंसानांसमूहागणाः मानसंसरइ
वअस्तलुरक्ताःपुरुषप्रणयिनोभक्तजनानामोघाःसमूहाःतंश्रीहरिमनुदुद्रुवुःपश्चाद्धावंतिस्म॥३॥ वाहेति
वाहसाम्यस्यचारवोरम्यायेचरणक्रमस्यपादन्यासस्यभेदाविचित्रगतयस्तैःसार्थः तैश्चंचलानिअंबराणिवासां
सियस्यसःसचासौमनोहरमूर्तिश्चतथोक्तःसःप्रसिद्धःएषश्रीहरिःपथिमार्गेद्विवसतीरात्रीवसतिरात्रि
वेनूमनोऽस्मिमरःनीत्वानिर्गमय्यजीर्णदुर्गनगरंप्रतिपेदेप्राप॥४॥ प्रसंगात्तद्वर्णयतिआपणेतिचा

वाहचारुचरणक्रमभेदैश्चंचलांबरमनोहरमूर्तिः॥ द्वेसएषवसतीपथिनीत्वाजीर्णदुर्गनगरंप्रतिपेदे॥४॥
आपणावलिगृहैर्विराजतेचारुचत्वरसदोनिकेतनम्॥ इंद्रकार्मुकविचित्रगोपुरंपस्त्रदीप्तमणिरत्नतोरणैः
५॥ रूणिरम्याणिचत्वराण्यंगणानिसदसःसभायानिकेतनानिस्थानानिचयस्मिंस्तत्तथोक्तंइंद्रस्यकार्मु
कंचापंतद्वद्विचित्राणिगोपुराणिपुरद्वाराणियस्मिंस्तत्तथोक्तम्गोपुरंतुपुरद्वारमित्यमरः यत्नगरम्आप
णाःनिषद्यास्तेषामावलयःगृहाणिसदनानिचतैः प्रदीप्ताःप्रकाशमानायेमणयोरत्नानिचतेषांतोरणा
नितैश्चविराजतेशोभतेरथोद्धतावृत्तंलक्षणंतूक्तंप्राक्॥५॥ यदितिफलटुगंधोयस्तत्तथोक्तंसमासांतेकारः

यत्र सलिलं जलं तेनोक्षिता सिक्ता क्ष्मा भूमिर्यस्य तत्तथोक्तं कीर्णो विक्षिप्तो लाजा भर्जितव्रीहयः कुसुमानि
च यत्रांकुरा नवांकुरा अक्षताश्चाक्षतास्तंदुलाश्च यस्मिंस्तत्तथोक्तं यन्नगरं मंदुरा वाजिशालास्ताः श्रितैः तत्रस्थितैर्हयै-
रश्वैः वाजिशालातु मंदुरेत्यमरः चीनचेलानि वस्त्रविशेषास्तैर्विरचितैर्निर्मितैः केतुभिर्ध्वजैश्च विरोचते राजते ॥ ६ ॥ य
द्विति विभासिनः प्रकाशमाना ये कुरुविंदाः पद्मरागमणयो मौक्तिकानि चैतैः उल्लसद्भिरुत्कृष्टैः वस्त्राणि प्रणि

यत्क्षगंधिसलिलोक्षितक्ष्मं कीर्णलाजकुसुमांकुराक्षतम् ॥ मंदुराश्रितहयैर्विरोचते चीनचेलरचितैश्च केतु-
भिः ॥ ६ ॥ यद्विभासि कुरुविंदमौक्तिकैर्वस्त्रविद्रुमहरिन्मणिरत्नमैः ॥ भासुराश्च वलभीवितर्दिषु भ्राजते स्थितखगाकुं-
तनादितम् ॥ ७ ॥ यत्र पुष्परचनास्फुभूमिषु पेतुषी मधुलिहामरोचत ॥ नीलरत्नमयदृष्टिरावलिरंबरादिव निया-
तिनी भृशाम् ॥ ८ ॥ शोभायाश्च विद्रुमाणि प्रवालानि च हरितो हरिद्वर्णमणयश्च तैश्च भास्वराः प्रकाशमानाः सु वल-
भीवक्रदारुछादनानि वितर्दयो वेदिकाश्च तासु स्थिता ये भ्रांकुताः पक्षिणस्तेषां विनादितं यन्नगरं भ्राजते शोभते
७ ॥ यत्रेति यत्र यस्मिन्नगरे पुष्पाणां रचनया सुतास्तथोक्तास्तासु भूमिषु क्षितिषु पेतुषी पतिता मधुलिहां भृंग-
राणां मुक्तावलिः पंक्तिः अंबरात् गगनात् निपातिनी निपतंती प्रचुरा मणिनालानि रत्नानि येषां तथाभूता याहः ॥२॥

ष्टिः सेव भृशामसंतं अरोचत अराजत ॥ ८ ॥ यत्रेति यत्र यस्मिन्नगरे सौधेषु राजसदनेषु सौधः स्त्री राजसदनमि-
त्यमरः रमणीया या भंजिका शिल्पिप्रतिमास्तासां वक्त्राणि मुखान्येव चंद्रकाः शुभ्राः स्वार्थिकः कन् तेषु ये कलंक-
भूता रंकवो मृगाः कंधराः गृहदारुविशेषेषु विरचितास्तैस्तथोक्तैः मृगाधिपैः सिंहैः स्वीयः कुक्षिः स एव नि-
योनिवासस्थानं येषां ते तथाभूताः कृता इव भक्षिता इवेसुसेक्षा ॥ ९ ॥ विचित्रेति यस्मिन्नगरे नितांतानि गृह-

यत्र सौधरमणीयभंजिकावक्त्रचंद्रककलंकरंकवः ॥ कंधराविरचितैर्मृगाधिपैः स्वीयकुक्षिनिलयी कृता इव ॥
९ ॥ विचित्रवर्णोपलरत्नजालिस्तंभोरुकांतिच्छुरितांतरिक्षा ॥ यस्मिन्नितांतं स्फुटभिन्निका स्फुरंतुर्मयूरा इव चित्रहं-
साः ॥ १० ॥ यत्रांगणान्तस्फटिकायतार्चिःसोपानबिंबाः समभुर्नितांतम् ॥ ध्वजा विलोला इव देवसिंधोर्गंगातरं-
गांतरलोलमीनाः ॥ ११ ॥ शितेष्वांस्फुराः प्रकाशमानाः या भित्तिका भित्तयः कुड्यानि स्वार्थे कन् तेषु चित्रेषु निर्मि-
ताहंसाश्चित्रहंसाः शाकपार्थिववादित्वान्मध्यमपदलोपः विचित्रो नानाविधो वर्णो येषां ते तथोक्ता ये उपला मणयो
रत्नानि चैतैः शालिनः शोभमाना ये स्तंभास्तेषां या उरुर्महती कांतिस्तया छुरिता निखिला प्रान्तिरस्वरूपाणि येषां ते तथो-
क्ताः संतो मयूरा बर्हिण इव रेजुः चकाशुः ॥ १० ॥ यत्रेति यत्र नगरे अंगणानामजिराणां संबंधिनः स्फटिका निर्मला

यैःस्फटिकाः शुभ्रमणयस्तैर्यामायतं विस्तीर्णं यदर्चिः कांतिस्तद्दीप्युतं तथोक्ताः ये सोपानाः आरोहणानि आरो
हणं सोपानमित्यमरः तैर्बिंबानि प्रतिबिंबानि येषां ते तथोक्ताः विलोलाश्चलंतो ध्वजाः देवानां वर्त्म नभ
स्तस्य गंगा आकाशगंगा तस्या अंतरे मध्ये विलोला ये मीनास्त इव नितांतमदभ्रंसमं बभुर्विरेजुः ॥११॥ कर्पूरेति
यत्र नगरे कांचनानां जालकानि वातायनानि तेभ्यो विनिर्गतं विनिःसृतं कर्पूरं कालागरुः कृष्णागरुस्तयोर्धू
मस्य जालं समूहः कर्तृ आगतानां श्रीहरिक्षणार्थमुपेयुषाम् तनुभृद्व्रजानां देहधारिसमूहानां संबंधी निर्यन्

कर्पूरकालागरुधूमजालं विनिर्गतं कांचनजालकेभ्यः ॥ यत्रागतानां तनुभृद्व्रजानां निर्यन्नमस्कां इवोच्चकासे
१२॥ निकरो यदगारवेदिकावरनिर्व्यूहविटंकनीडकः ॥ क्षणदात्तनतारवश्रुतिर्व्यसोच्छात्रसमानतां ययौ ॥१३॥

निःसरन् यत्तमसो ज्ञानस्कंदः समूहः स इव उच्चकासे विरेजे ॥१३॥ निकर इति यस्य नगरस्य यास्मगाराणि गृहा
णि तेषु वेदिकाः वितर्दयः स्यात् वितर्दिस्तु वेदिकेत्यमरः तासां वराः श्रेष्ठा निर्व्यूहा मत्तवारणास्तानुपाश्रया नि
र्व्यूहो मत्तवारणमिति वैजयंती तेषां विटंकाः कपोतपालिकाः कपोतपालिकायां तु विटंकं पुंनपुंसक
मित्यमरः त एव नीडः कुलायो यस्य सः कुलायो नीडमस्त्रियामित्यमरः तेषां द्विजादीनां पक्षिणाम् ॥३॥

वयः पक्षिणः वाय्यादावितिविश्वः निकरो ब्रि—ः क्षणदा रात्री तु जननतायाः जनसमूहस्य आरवो वेदादिस्त्छात्रा
भ्यसनत्वाद्ध्वनस्तस्य श्रुतिः श्रवणं यस्य स तथोक्तः सन् छात्रसमानतामंतेवासितुल्यतां ययौ छात्रांतेवासिनो शि
ष्य इत्यमरः समीपे प्रतिवाक्यं यथा श्रुतमुच्चारणाद्वत्सु लेक्षते अत एव स्फुटमिति संज्ञकप्रयोगः ॥१३॥ नवकुंकुमे
ति यत्र नगरे नवं कुंकुमं यस्मिंस्तत्तथोक्तं यत् नव्यं वरमंबु अंभो र्णस्तोयं पानीयं नीरक्षीरांबुनत्रं वरमित्यमरः तेनोक्षि
ताः सिक्तास्तथोक्ताः मनोहरा रमणीयाः आयता दीर्घाः राजपथा राजमार्गाः कलधौतस्य हेम्नः शिलादृषदस्ता

नकुंकुमनव्यांबरोक्षिता नितरां राजपथा मनोहराः ॥ कलधौतशिलाभिरायतारचिता यत्र यथोच्चकासिरे ॥१४॥ इंदी
वरश्रेणिसमानभासस्तस्योडुपांडुत्वभृतातपत्रम् ॥ दिनेश्वरोसन्निनदोपरिष्टाद्भन्मराद्युतिजिद्दभुभक्तः ॥१५

भिः रचिता यथा निर्मिता इव नितरामदभ्रं उच्चकासिरे विरेजिरे ॥१४॥ तस्योपरिष्टाद्भक्तरुतं छत्रधारणमाह इंदी
वरेति इंदीवराणि कुवलयानि नूपामंत्राणि तिकंचेनीलं कुवलयमिंदीवरं चनीलाक्षमिति नाममालातेषां याश्रेणिः
पंक्तिस्तया समानातुल्या भाः कांतिर्येषां तस्य तथोक्तस्य तस्य श्रीहरेः उपरि इति निर्दोषः भक्तोरल्न जितारस्य उडुनक्ष
त्रं तद्वत्पांडुसि भृंग अत एव दिनेश्वरः सूर्यस्तस्माद्भसति रुद्वचो यस्याः सा तथोक्ता यमुना तस्या नदी ज्ञदस्तस्यो

हरिसं· परिक्षाद्दूर्ध्वभ्रमंतीये मंडलभूताः मराला हंसास्तेषां व्रजः समूहस्तस्य द्युतिः शोभा तस्या जित्वर्युज्जयवती लंग्लानि सर्ग-१६
॥४॥ स्थस्य गुरुस्तु रितिस्तु घसय: आतपत्रं छत्रम् अभूत विस्त्रंभेण भृतवान् भवः कर्त्ते शितुड्. स्वस्ति क्षितइ सात्मने
पदं नच्छेति सिच: क्विवादगुणः कृस्वादं गाद्दितिमिचोलोप: अत्रोपमालंकारः॥१५॥चामरश्रियं वर्णयति तस्ये
तिनसमश्री हरेः इंदुनीलानांमणीनाया मंतराणि विवराणि तेषु रोचमानाः शोभमानायेक्षपाधिनाथस्य चंद्र
स्यांशवः किरणाः तेषांचयो निकरस्तपमानं ययोस्ते तथोक्ते प्रकीर्णके चामरे अंबुराशेः समुद्रस्य वातो वायुः

तस्येंद्रनीलांतररोचमान क्षपाधिनाथांशुचयोपमाने॥ वात्तोंबुराशेरिवफेनपुंजे प्रकीर्णके चालयतः स्म
भक्तो॥१६॥तस्मिन्प्रविष्टं तुरगाधिरूढं तं द्रष्टुमारादनघं जनौघाः॥विचित्रवाद्यश्रवणीयनादैस्तूर्णं समाये
द्धरिवोपहूताः॥१७॥ फेनपुंजे डिंडिभकूटे द्दवभक्तो सोमसुराख्यपार्षदप्रवरोद्वानेशितिवोषः चालयतः स्म अ
धुवताम्॥अत्रोपमयोः संकरः॥१६॥तस्मिन्निति तस्मिन्पुरे प्रविष्टं कृतप्रवेशम् तुरगाधिरूढं हयनिषण्ण
म् अनघं निर्दोषं तं श्रीहरिम् द्रष्टुं निरीक्षितुम् जनौघाः जनसमूहाः विचित्राणि यानि वाद्यानि तेषां श्रवणीया
मधुरत्वाच्छ्रोतुमर्हा ये नादास्तैः उपहूताः हूताद्धाना इव तूर्णं द्रुतम् आरात्समीपे समासेदुराजग्मुः॥१७॥ ॥४॥

तं विशिनष्टि त्रिभिः स्वर्णमिति स्वर्णस्य कनकस्य सूत्राणि तंतूनि यस्मिंस्तं तथोक्तम् मनोज्ञं रम्यम् त्राणं
रक्षकम् निद्रागंस्त्रावरणम् निद्रारक्षकमावरणे हिमानिल निवारण समर्थः दधतम् स्कंधयोरंसयोरुल्लसद्भ्राज
मानं भास्वरं प्रकाशमानं चारु सुंदरं चंचलं वासो यस्य तं तथोक्तम् कटीतटे श्रोणिप्रदेशे भ्राजमानं वस्त्रं विचित्र
वस्त्रं येन सत तथोक्तस्तम् नयनानामभिरामम् आह्लादकस्तं तथोक्तम्॥१८॥मणींद्वितिमणींद्राः श्रेष्ठमणयो मुक्ता

स्वर्णसूत्रं दधतं निदाघं त्राणं मनोज्ञं नयनाभिरामम्॥स्कंधोल्लसद्भ्रास्वरचारुचेलं कटीतटानद्धविचित्रवस्त्रम्
१८॥मणींद्रमुक्ताफलसत्प्रवालस्वर्णरत्नचामीकरत्रोरवरावलीम्॥कौसुंभमुष्णीषमनर्घमीनांमधिोल्लसच्छेखर
मादधानम्॥१९॥नानोपलस्वर्णविचित्ररत्नमुक्तामयालंकृतिभूषणांगम्॥पदं तु रंगेण पुनाधितारदंविधाप
यंतं विचलत्तवलीनम्॥२०॥
फलानि च मंसुन्तमानि यानि प्रसूनानि च स्वच्छरत्नानि च चामीकरं स्वर्णं च तेषां
शोरवरा माली डास्तेषामाली: पंक्तिर्यस्य तं तथोक्तं कौसुंभं कुसुंभरागयुक्तं कं अनर्घमभूल्यं मधेशल्लसत्
राजन्तु शेखरो यस्य तं तथोक्तम् उष्णीषं शिरः पटं दधानं इत्रोंसर्वनियंतारं॥१९॥नानेति नानाविधाये उपला मणयः
स्वर्णं हेम विचित्राणि रत्नानि च मुक्ता मौक्तिकानि च प्रचुराणि नानोपलादीनि यासु कृतास्तथोक्ताभिः अलंकृ

तयोर्भूषणानि तासां भूषणानि मंडनभूतानि अंगानि यस्य तं तथोक्तम् विचलत् चंचलं खलीनं कविकामु
खरज्जु रितियावत् यस्मिन् कर्मणि तद्यथा तथा कविकातुरवलीनो क्तसमरः तुरंगेणाश्वेन पुलायितास्वं
पुलानामप्लुतास्यनेकापरनामाह्वयानां गतिविशेषः तदुक्तं हयलीलावत्याम् प्लुतां ज्ञत्वं गितामाकुर्याधारावु
लनामिधा पुनरेनां रधीपाव्यां पुलामिसाहदेशकः तद्दलक्षणमपि तत्रैवोक्तम् क्षिपतिसमविशेषानुत्क्षिपस
ग्रपादान् प्रसरति पुरतोऽश्वः साश्वधारा पुलारमा विलसतिसमपादोत्क्षेपणा कुंचनानां करणमिह गतिज्ञाः

उदारसौंदर्यपरिष्ठवेक्षं सविस्मयाः स्मेरमनोरमास्यम् ॥ पौराः पपुस्तं नयनैरतृप्तैर्नवोदयं चंद्रमिवेक्षणीयं
२१॥ प्राकृतमेपुलारमामितियावर्हिणिपधानं प्रविधाय रागात्वलगं अश्वथी हृत्सवहेसुलारमामिसादितया अ
पितमयनं गतिः पुलायितं अयगतोभावेक्तः तदुत्सवाक्षिपतिसमविशेषानिसाद्युक्तरीसाभिधानं यस्म
अन्तथोक्तम् पद्पादमासं विधाप्यसतं कारयंते ॥ २०॥ उदारेतिउदारं महत् सौंदर्यं रम्यत्वं यस्य सः परि
ष्ठवं चंचलेक्षा दृष्टिर्यस्य सः तयोर्विशेषणसमासः स्मेरेण मंदहास्येन मनोरमं रम्यं आस्यं मुखं यस्य तम् ईक्ष
णीयं दर्शनीयमूर्त्तिं तं श्रीहरिम् पौराः जीर्णदुर्गाख्यपुरजनाः नवोनूतनउदयो यस्य तं चंद्रमिव अतृप्तैरपरिपू ॥५॥

र्णैः नयनैः सविस्मयाः साश्चर्याः संतः पपुः सादरावलोकनं चक्रुरित्यर्थः ॥ २१॥ तूर्यप्रणादैरितितूर्याणां वाद्या
नां प्रणादैः नादैः उपकृताः कृताकाना इवेत्यर्थः पुरेभवाः पौर्यः तत्र भवस्य इत्यण् टिड्ढाणञ्जिसादिनाङीप् तथाभूता
या अंगना योषितः स्त्रियः पुंवदित्यादिना पुंवद्भावः कमनीयमूर्त्तेः रम्यतनोः मनोजन्मशत्रोः कामपराभूतिपदीय
सः तस्य श्रीहरेः निरीक्षणाय दर्शनाय सत्का अनिरुत्समा निकार्यो तिथ्याभिस्तास्तथोक्ताः सत्सोरथ्यां रथ्यां प्रतीति
प्रतिरथ्यां यथार्थेऽव्ययीभावः त्वरया निवेगेन ईयुः प्रापुः एतेन तासां श्रीहरिनिरीक्षणे कालाक्षमत्वमोक्तकम

तूर्यप्रणादैस्त्वरयोपकृता निरीक्षणाय प्रतिरथ्यमीयुः ॥ सत्कामकार्याः कमनीयमूर्त्तेः पौरांगनास्तस्य मनो
जशत्रोः ॥ २२॥ विलोक्य सामित्वगृहीतभूषाः करोच्चया रूस्त्रवदंशुकाग्माः ॥ सौधालयप्रांशुकुरिवाधिभित्ति
स्त्रियो इहासंपटहप्रणादैः ॥ २३॥
मुक्तम् ॥ अत्रपौरांगनाप्राप्तेः प्रवेशवाद्यश्रवणानंतर्यात्तदुपकृतोत्सेक्षा
अंतलकाप्रयोगाक्रमा ॥ २३॥ अथ पौरांगनानां त्वरोपलक्षिकां शृंगारचेष्टां दर्शयति विलोक्येतियत्र नगरे
इतिशेषः सौधालयः सौधपंक्तयः सामीसर्द्धचाचकमव्ययं सामित्वं अर्द्धतुगुप्सितइत्समरः तस्य भावः सामि
त्वमर्द्धत्वं तेन गृहीताः स्वीकृता भूषा याभिस्तास्तथोक्ताः करेषु हस्तेषु उच्चया वस्त्रग्रंथयो यासां तास्तथोक्ताः

नारीकटांशुकग्रंथौनीवीस्याद्बन्धयोप्युभयोरितिमार्कंडेयः करगृहीतवासोग्रंथयइत्यर्थः स्खलतांस्त्रंसंतिगलंतिअं
शुकाग्राणिश्रेष्ठपरिधानानियासांताः अंशुकंवस्त्रमात्रेस्यात्परिधानोत्तरीययोरितिविश्वः वाराणस्त्रियः स्त्रीवा
मुन्रासोरितीयद्गादेन्रा: अवलीकाअधिभिन्निभिन्निषुविभक्त्यर्थेमयीभावः यदह्यवगाढेर्वाद्युप्रतिस्वनैः
अट्टहासमुच्चैर्हासंचक्रुरिवेसुस्मेक्षाविहृलतदर्शनाट्टहासोभवतीतिभावः अत्रकुतूहलारब्धांचेष्टाकुतूहलंरम्य
दृष्टेचापलंपरिकीर्तितमितिलक्षणात् ॥२३॥ समापतन्निनिद्राकद्रुतंत्वरयेत्यर्थः द्राक्झटित्सपदिद्रुतेइस

समापतन्हारपदेदधसः कांचीः शिरोजार्पितकर्णपूराः ॥ ताटंकतोद्भ्रमवलयास्पदेषु स्त्रियोविपर्यासतयांशुकानि
२४॥

मरः हारस्यपदंस्थानंतस्मिनवक्षसीत्यर्थः कांचीः स्त्रानादधसोविभ्रमसः ताटंकतस्ताटंकानकर्णिकारमश्रवणपूर
कान्वलयास्पदेषुकंकणस्थानेषुदधसः शिरसिजाताः शिरोजाः केशास्तेष्वर्पितानिहिताः कर्णपूराअवतंसायाभि
स्ताः स्त्रियः विपर्यासतयाविपरीतत्वेनअंशुकानिवसनानिदधसः सम: समापतन् धावंतिस्मएतेनविभ्रमाख्याचे
ष्टान्काविभ्रमस्त्वरयाकालेभूषास्थानविपर्ययइतिलक्षणात् सचभ्रांतिमूलइतिभ्रांतिमदलंकारोप्यस्तते॥२४ ॥६॥

युगक्षयइतियुगक्षयेकल्पांतेवार्द्धेर्नूतेइतिवार्द्धिन्यायः समुद्रन्यायनस्तेनअधिकरणेनूतेरिसच्प्रसयः अ
युवासवामिकृकालादितिविकल्पादलुगभावः येनश्रीहरिणाउदारेमहतिकुक्षौभुवनानिपीतानिधृतानी
तिभावः सश्रीहरिः नार्यापुनः कयाचित्सुरांगनयातुमदविभ्रमेणमदविकारेणअसमग्रमसकलमर्द्धमि
लितमित्यर्थः यदेकंविलोचनंनेत्रंतेनपर्यपीतः कर्मतापिदसत्ददर्शइत्यर्थः अत्रकुक्षिकोणविविष्टनि
खिलभुवनस्यश्रीहरेर्महत्त्वआधेयस्यात्मतरेकनारीकटाक्षकोणाधारत्वोक्त्याचमत्कारोधिकालंकारः आ

युगक्षयेवार्द्धिन्यायेनयेनपीतानिकुक्षौभुवनान्युदारे ॥ पुनः सनार्यामदविभ्रमेणपपेः समग्रैकविलोचनेन
३५॥ तदेकयाभादधिरूढयोच्चैः कृतानिलालंघ्यतेभियाति ॥ पताकयेवातिसमीरधूतवस्त्रांतयायत्रनि
जंनितांतम् ॥३६॥ धाराधेययोरानुरूप्याभावोधिकोमतइतिलक्षणात् अयंचतात्कालिकविकारात्माविः
लासाख्योभावोपत्कटाक्षवीक्षणंतात्कालिकोविशेषः स्याद्विलासोंगक्रियादिष्वितिदर्पणरूपकात् ॥३५॥
तदेकयेतियत्रनगरेतच्चैरुन्नतंनितांतमीषुंनितांतंसदनंपतिअधिरूढयातत्रारोहणंकृतवसानेतिचक्रु
लोपः समीरेणवायुस्तेनधूतः कंपितोवस्त्रांतोवसनप्रांतोयस्यास्तयाएकयाकयाचिन्नार्याहेतुनाततजी

र्णदुर्गनगरंद्वयवनेधर्मात्मजेश्रीहरौअभियातिआगच्छतिसतिर्यातिलदः ग्रात्रादेन्राः पताकयावैजयंसा हू
तात्प्रसधिकालीलाम्रोभायसतत्तथोक्तमलंकृतमिवेसुस्वेक्षात्प्रभात्भातिस्मसर्वस्यापिनगरस्यस्वयं
पताकैवरराजेसुस्वेक्षात्तस्याः सकलपुरस्योब्धितिन्नायिलावण्यंप्रसतेतृसलंकारेणावस्तुध्वनिः अत्रनि
न्नांतारोहणंकुतूहलत्वम् ॥३६॥ अवाकिरन्निति प्रतिगृहंगृहेषु विभक्त्यर्थेअयीभावः अंगनाः पुरंध्रयः
विस्फुरदाविभिन्नायेशुक्तिकोन्नाः शुक्तिपरास्तैर्विमुक्तानिविसृष्टानियानिमुक्तापटलानिमौक्तिकपुंजानितै

अवाकिरन्क्ष्ममिवांगनास्तंमसंभ्रमेमंगललाजमाल्यैः ॥ प्रतिगृहंविस्फुरच्छुक्तिकोन्नाविमुक्तमुक्तापटलैः
रिवेन्राम् ॥३७॥ आत्मगेहचलनाद्दरोछ्रितानागमन्निवविलेख्यनिर्मिताः ॥ मानसंचसहतेनभूस्तताया लयं
सद्वयातमंगनाः ॥३८॥ शिवस्थितैरिसुस्वेक्षामंगलार्थयेलाजास्तेमाल्यानीवतैः आचारलाजैरित्यर्थः ई
न्नांसर्वनियंतारंतंश्रीहरिंछद्ममिवहस्तिनापुरागतंछद्मयथापौरयोबितः अवाकिरंस्तद्वदित्यर्थः ससंभ्र
मंसादरंयथातथाअवाकिरन्अक्षिपन्पूजार्थमित्यर्थः ॥३७॥ आत्मगेहेतिकिंचतिचार्थैः अंगनाः स्त्रि
यः तेनश्रीहरिणासहयातंगतंमानसंयायालयंसद्वयतीक्षमाणाइत्येसुस्वेक्षाभूस्ततांनिरोजस्कतांगता ॥५॥



इतिशेषः आत्मनांस्वेषांयानिगेहानिगृहाणितानिप्रतिचलनंगमनंतस्मिन्यत्आदरस्त्वरानेनोछ्रितारहिताः
निहन्तनिजगृहन्नाम्पेक्षात्इत्यर्थः विलेख्येचित्रेनिर्मिताश्चित्रलिखिताइवेसुस्वेक्षानागमन्स्वगेहानिप्रतिन
यांतिस्मनिःस्पंदमासन्नित्यर्थः ध्यानंचित्तेहितानाम्पैः भूस्तताश्चास्तापच्छदितिदन्नास्रूपकेअत्रोत्प्रेक्षयोः सा
पेक्षत्वात्संकरः ॥३८॥ नितांतसक्तैरितिगृहाहिणपःस्त्रियः नितांतसक्तैः श्रीहरिमूर्त्तौवसंतप्रीतिमद्भिःनयनैर्ने
त्रैः पवित्रःसच्छास्त्रविहितत्वादंतःकरणशोधकोधर्मएकांतिकत्वर्थोयेषांतेषुअन्वयःप्रादुर्भावोयस्यस

नितांतसक्तैर्नयनैर्गृहिणपःपवित्रधर्मान्वयमन्वगच्छन् ॥ सोतिमिरैनंपतिमोषधीनांग्रारसस्रस्तैरिवयामव
सः ॥३९॥ विस्तीर्णनेत्रांजलिभिर्नितांतंनामाधवाद्भ्रंरसेनतूर्णम् ॥ पातेनवेल्लमाम्लसैर्वपुष्कैःत्रानैःत्रानै
ईर्भरतःप्रतीयुः ॥३०॥
तथोक्तस्तम्यत्रापवित्रःसर्वजनशुद्धिकरोयोधर्मस्तदवतारत्वेनप्रादुर्भूतोहरिप्रसा
दाख्यद्विजस्तस्मात्अन्वयोनेकजनश्रेयोविधिप्रयाप्रादुर्भावोयस्यसतथोक्तस्तम्एनंश्रीहरिम्यामवसोरा
त्रयःत्रारदिप्रसन्नैर्घनम्पायत्वान्निर्मलैःज्योतिभिर्नक्षत्रैःओषधीनांपतिंचंद्रमिवअन्वगच्छन्ननुजग्मुः
॥३९॥ विस्तीर्णेति विस्तीर्णानितदीर्घौक्ष्यत्वेनाधिकप्रसारितत्वाद्वित्राणानीत्यर्थः तथोक्तानियानिनेत्रा

णितामेवांजलघुस्ले: नितांतमसंतंतन्तूर्णद्गुतंपीतेनास्वादितेनमाधवादक्षरसेनमानास्तिधवः पतिर्यस्याः
॥८॥ स्तस्तंत्रनयास्वयमेवसर्वनियंताश्रीहरिरित्यर्थः मएवजमदभ्रंबकुलंयोरसो ऽमृतंतेनअसमत्रमधुमद्यंतद्स्यंबंधि
नादक्षरसेनबकुमाधुर्येणरसोरागोविषवीर्यैतिक्लादोयास्देकुवेरसमास्वादनेद्दम्निनिर्यासेऽमृतवाद्ग। योरिति
चेजयंतीकुर्भरतोद्गुभ्रंशेगुरुभिरित्यर्थः अतएवअलसैर्मंदनेमंथरैः वपुश्चाणपपीवस्त्वारे शाणिसर्थः अप्र
त्यद्रुतिपरिमाणपचर्यैकनृपसयः तेरूपलक्षितास्ताः योरक्ष्मियः वेतृमानिगृह्वाणिनूनैः स्रानैः प्रतीयुः ग

सभाक्तितोराजपथेद्विजानांगणैः समुच्चारितवेदमंत्रैः॥ तनेरूपग्राह्यकैरसंख्यैरुवासरम्योपवनेसतस्य॥२०

द्वंनिसमस्यंलघुमपिरसभरणाक्रुरूणिभवंतीतिभावः अत्रमाधवरसकुर्भरतस्यविशेषणगसान्तानैः प्रतिया
तहेतुत्वात्कार्याहेतुकंकाव्यलिंगमलंकारः तस्यमाधवरसेतिश्लेषमूलातिशयोक्त्युत्थापितमितिसंकरः॥१९
सभाक्तितद्रुतिराजपथेराजमार्गेसमुच्चारिताः सम्यक्भणितावेदमंत्रायैस्तैस्तथोक्तैः द्विजानांविप्राणांगणैः
सभाजितः पुष्पचंदनादिभिर्यथाविधिसंपूज्यसत्कृतइत्यर्थः उपग्राह्यमुपायनानिकरयोर्येषांतैस्तथो
क्तैः असंख्यैरनेकैर्जनैः पुरवासिभिश्चसभाजितः सत्कृतः सः श्रीहरिः तस्यजीर्णदुर्गनगरस्यरम्योपवनेरम ॥८॥

णीयारामेउवासनिवासंकृतवान्॥२१॥ मइति तत्रतस्मिन्नुपवनेस्वाश्रितास्वभक्तास्तेषांकामाः अभिलाषास्तै
षांपूरः पूरकः तेषांधर्मज्ञानवैराग्ययुक्तभक्तिरुचिदर्शनात्प्रतीतः प्रसन्नः ख्यातेहृष्टेप्रतीतहृष्टमरः सः श्रीहरि:
आलिषुमसंक्तिषुमुकुः पुनः पुनः चरन्त्रजनभक्ष्याणामदनीयानांसंज्ञास्तत्तन्नामानिवदन्सन् भोज्यान्यद
नीयानिवस्तूनिपरिवेषयित्वातेषांपरिवेषणंकृत्वासाधून्संतोअभोजयत् भोजनमकारयत्॥२२॥ मइतिपु
गमेनाहतत्रतस्मिन्नुपवनेपरिणद्धंनिबद्धंमंडलंयैस्तैस्तथोक्तैः मंडलाकारतयाचरद्भिरित्यर्थः हृष्टैः श्रो

सतत्रसाधून्परिवेषयित्वाविचित्रभोज्यानिवदन्प्रतीतः॥ मुकुन्दपंक्त्यालिषुभक्ष्यसंज्ञाश्च भोजयन्स्वाश्रितकामपू
रः॥२२॥ सतत्रपद्यानिहरेः सतांगणैरुदीरयद्भिः सहतालिवादनैः॥ अरंस्तहृष्टैः परिणद्धमंडलैर्मुदाप्रगायन्सह्नतना
लिकारवः॥२३॥ विचित्रचंचल्लरभास्वरांबरः समुद्धसत्किंकिणीघोषनूपुरः॥ मनोरमोरः स्थलसज्ञानतप्रसूनहा
रावलिलोलकंकणः॥२४॥
हरिलीलावलोकनप्रसन्नमानसैरित्यर्थः तालिवादनैः सहसार्द्धंहरेः पद्यानितद्गुणोनि
बद्धप्राकृतपद्यानि उदीरयद्भिर्गायद्भिः सतांसाधूनांगणैः सहसार्द्धंसः श्रीहरिः कृतस्तालिकारवः करतलध्वनि
र्येनसतथोक्तः मुदाप्रगायन्नुच्चैःस्वरगानंकुर्वन्सन् अरंस्तक्रीडितवान्॥२३॥ विचित्रेति विचित्राणिनानावि

हरिसं· ॥९॥ धानिचंचन्नराणि चंचलानि भासुराणि द्युतिमंति चरूणं वराणि वासांसि यस्य सतथोक्तः समुद्वहन् शोभमानः। सर्ग·१६
किंकिणीनां घोषः शब्दोपयोस्तथाभूते नूपुरे यस्य सतथोक्तः मनोरमं रम्यं यद्वरः स्थूलं वक्षः स्थलं तत्र शांत
सौरभाण्पनुग्रस्रगंधी नियानि प्रसूनानि पुष्पाणि तेषां हारास्तेषामावलिः पंक्तिर्यस्य सः लोलानि गतिज
वेन चंचलानि कंकणानि शोखरायस्य सः तयोर्विशेषणसमासः ॥ २४ ॥ तदेति तदा तस्मिन्समये अभ्रे गगने
विमानानां पंक्तयः आवलयो येषां तेस्तथोक्तैः तस्य श्रीहरेरालोकनं दर्शनं तेन विस्मयः आश्चर्यं तेनाकु
तदा तदालोकनविस्मयाकुलैः सुरव्रजैरभ्रविमानपंक्तिभिः॥ करैर्विमुल्कानवपुष्पदृष्टयो निपेतुराहृष्ट ष
डंघ्रिसंचयाः॥ २५ ॥ हरमंदिरविधापनमंत्रं तत्र सः समकरोदनुरक्तैः॥ सत्तमैर्निपुणधीभिरुपेतो देहभङ्ग
तविमुक्तिचिकीर्षुः॥ २६ ॥ लाभाप्तास्तेस्तथोक्तैः सुरव्रजैर्देवसमूहैः करैर्हस्तैः विमुक्ता विसृष्टाः आहृष्टा
षडंघ्रीणां भृंगाणां संचयाः समूहा याभिस्तास्तथोक्ताः सौरभलोभान्निमंत्रितदाहृतसर्थः नवानि यानि पुष्पा
णि तासां दृष्टयो वर्षणानि निपेतुः पतंति स्म॥ २५ ॥ हरमेति देहभृतां शरीरिणां भवात्संसारान्मुक्तिमोचनं ॥९॥
चिकीर्षुः विधित्सुः सः श्रीहरिः अनुरक्तैः स्वस्मिन् प्रीतिमद्भिः निपुणधीभिः कुशलबुद्धिभिः सत्तमैर्मु

क्तानंदादिसाधुपुरुषैः उपेतो युक्तः सन् तत्र तस्मिन्नुपवने हरमस्य यन्मंदिरं तस्य विधापनं कारयितव्यं न
स्य मंत्रं रहो विचारं समकरोत् व्यदधात् ॥ २६ ॥ अथेति अथ मंदिरविधापनमंत्रविधानानंतरं सः श्रीहरिः भ
क्तवारैर्भक्तसमूहैः सहसार्द्धं रैवतक्षोणिभृति रैवतनाम्नि पर्वते प्रतीतं विख्यातं दामोदरारव्योयः कुंडस्तदेव
तीर्थं तदेसगत्वा तत्रे तिशेषः स्नात्वा द्विजन्मभ्यो विप्रेभ्यो ऽर्पितं दत्तं भूरि प्रचुरं वित्तं धनं येन सतथोक्तः स
अथेसदामोदरकुंडतीर्थं सरैवतक्षोणिभृति प्रतीतम्॥ स्नात्वाद्विजन्मार्पितभूरिवित्तः स्वावासमागाद्गृहभक्त
वारैः॥ २७ ॥ अथ साधुजनैः सदासनेरुरुचेहंसगणैर्हुतेहरिः॥ उपविष्ट उदयक्ष्माधरकूटे सजलोवलाहकः॥
२७ ॥ वसनानि दधन्मनोरमे विमलो दुग्धतिमानि विग्रहे॥ सद्वृतोवनुरसयो मुचारुरुचे रूपाममणिक्ष्माधरः॥ २८
नदंत्वमोपशिक्षणार्थं न तु तस्य तद्विधिना किंचिदप्राप्यं पूर्णकामत्वात् सकलतीर्थास्पदचरणत्वाच्च तस्येति भा
वः स्वस्य स्वः आवासो निवासस्थानं तमगात् प्राप्तवान्॥ २८ ॥ अथेति अथ स्वालयागमनानंतरं साधुज
नैः वृते वेष्टिते सदासने श्रेष्ठ विष्टरे उपविष्टो निषण्णः हरिः हंसगणैर्मरालसमूहैर्वृतेन उदयक्ष्माधस्उदयाचल
स्य कूटे शिखरे सजलो नीरसहितो वारिणां वाहको बलाहकः प्रद्योदसादित्वात् साधुमेघ इव रुरुचे सुशुभे॥ २७ ॥ वस

नानीतिमनोरमेरमणीयेविग्रहेदेहेविमलंयत्कुडुनक्षत्रंतत्प्रतिमायेषांतानितथोक्तानि ॥ अतिवलक्षाणि
॥१०॥ सर्थः ॥ वसनानिवस्त्राणिदधत् बिभ्रत् सः श्रीहरिः आरक्तयोमुचान्नारक्ताधिकमेघेन ॥ वृत्तोवेष्टितः नृपा
मायेमणयस्तेषांक्ष्माधरः पर्वतोवसदृवरुरुचे शुशुभे ॥ ७९ ॥ वलयेति वलययोः कंकणयोर्यामुज्वलरत्ना
नितेषांसंचयः समूहस्तस्ययाद्युतयः कांतयस्ताभिः यहन्तिविताविवसंजातनवांकुराविवास्थिताविसुत्
प्रेक्षाश्रितानांभक्तानांकल्पमहीरुहौमनोरथपूरणेकल्पतरूभूतौकमनीयौरमणीयौहरेः न्नायौकरौ

वलयोज्वलरत्नसंचयद्युतिभिः पल्लविताहरेरिव ॥ श्रितकल्पमहीरुहौभ्रयौकमनीयावधिकांतिमूहतुः ॥
८०॥ ज्वलितोपलकुंडलप्रभाश्रवणाभ्यर्णमिवेयुषीश्रुतिः ॥ व्यरुचसुरुवर्णरागिनीशुभवाल्लीपरिक्षिप्तमनाह
ता ॥ ८१ ॥

अधिकांतिंवक्रत्वशोभांकरहतुः वहतःस्म ॥ ८० ॥ ज्वलितेतिहरेरितिशेषः विधुरखोवकूला
येवर्णरंगाअमत्राक्षराणितैः राजिनीशोभमानाश्रवणाभ्यर्णकर्णसमीपमुपेयुषीप्राप्तावती ॥ ज्वलि
ताः ॥ प्रदीप्तातपलामणयोययोस्तेतथाभूतेयेकुंडलेतयोः प्रभाकांतिः ॥ शुभायावाल्लीतस्याः ॥ प
रिक्षिप्तमनभावप्रणंतत्रआहताआदरवताश्रुतिरिववेदक्रुगिव ॥ व्यरुचत् ॥ अराजत ॥ ८१ ॥ ॥१०॥

चरेतिशुभेमंगलेविपुलेविशालेतस्यश्रीहरेः अलिकेललाटेकृतोरचितः सवर्त्तुलः वरंश्रेष्ठंयच्चंदनंतस्य
चारुः रम्यश्चंद्रकः सुकुमारतरमतिकोमलंयद्दाननंमुखंतस्यपाश्रीः शोभातस्याः छत्रतुलांआतपत्रसाम्यं
समगात्प्रापत् ॥ ८२ ॥ विजितानीतिमनोहरश्रियारमणीयशोभावतातस्यश्रीहरेः पदाचरणेनविजितानि
स्वशोभयापराभूतानिसर्थः तथाभूतानिजलजन्मानिकमलानिलज्जयेवजलेअचलस्थितिमुपलभ्य

वरचंदनचारुचंद्रकोविपुलेतस्यकृतोलिकेशुभे ॥ सुकुमारतराननश्रियः समगाच्छत्रतुलांसवर्त्तुलः ॥
८२॥ विजितानिपदेनलज्जयाजलजन्मानिमनोहरश्रिया ॥ उपलभ्यजलेचलस्थितिंसततंतत्सतपांसिकुर्व
ते ॥ ८३ ॥ प्रतिबिंबवरत्नसंचयः समविस्तीर्णतरायतोल्लते ॥ परभागइवारुचद्धरेर्हदिहारः परभागशालिनः ॥
८४ ॥

घाप्यसततंनिरंतरंतपांसिकुर्वंतेविदधते ॥ ८३ ॥ प्रतिबिंबितेतिपरभागेगुणोत्कर्षेशालनशालतेइ
तिपरभागशालीतस्यतथोक्तस्यश्रीहरेः सममन्यूनाधिकत्वरहितंविस्तीर्णतरंविशालंतरंच आयतंदीर्घं
चउन्नतंतुंगंचतेषांविशेषणसमासः तस्मिंस्तथोक्ते हृदिवक्षसिप्रतिबिंबिताः संजाताप्रतिमानावर
त्नसंचयाः पदार्थसमूहायस्मिन्सतथोक्तः हारः परभागस्वोभावोभिप्रायइवारुचत् अराजत ॥ ८४

नवेनिष्क्रान्तितस्यकेनाप्यपराभूतस्यतस्यश्रीहरेः शुभयोः कृपार्श्वयोः नवोवोनूतनोदयः पार्वणः पूर्णिमायां
संपूर्णकलश्चंद्रस्तद्वत् चारुणीरमणीयेचामरेपक्कीर्णकेसमाश्रितेसनतंनिश्चलतयासंश्रितेस्फतपणकां
तिकांदृष्यः यत्राःकीर्त्तिश्चतेश्वसमभानांप्ररुचताम् ॥४५॥ आस्येतिपार्वणःपर्वणिभवःत्रारदःत्रारदिभ
वोहिमकरःत्रीतांशुश्चंद्रःतस्यश्रीहरेःआस्यंमुखंतस्यदास्यकरणंसेवाद्युश्रितंतत्रापियोग्यताप्राप्तिततां
नोजगामनप्रापकिलेतिनिश्चितम् किंचपद्गवेनवांकुरेतस्यश्रीहरेःयःत्रायःपाणिस्तस्यद्युतिःकांतिस्तस्य
नवपार्वणचंद्रचारुणीसमभानामृन्तितस्यचामरे॥ स्फतपोयत्रासीसमाश्रितेशुभयोस्तुस्यकृपार्श्वयोरिव॥
४५॥ आस्यदास्यकरणेपियोग्यतांनोजगामकिलतस्यत्रारदः॥ पार्वणोहिमकरोनतर्कयेतच्छपद्युतिलवो
पिपद्गवे॥४६॥ दुर्विधास्तदवलोकलालसादानशौंडमिवनैकदेशतः॥ तंश्रिताइवनयाविवेकिनःप्रापुर
त्रविनयंगुणाइव॥४७॥ लवोलेशोपिनास्तीसहंतर्कयेविचिंतयेइयंचक्रवेरुक्तिः॥४६॥ एवंतदीयल
लीवर्णयित्वातदवलोकनायागततदाश्रितश्रीसुदेकमाहदुर्विधाइतितस्यश्रीहरेरवलोकोवीक्षणंतत्र
लालसाःस्पृहावंतःदरिद्रानोत्कंवाइसर्थःश्रिताःश्रीहरिंशरणीभूताःभक्ताःतंश्रीहरिंस्तत्रास्मिन्लोके ॥२१॥

दुर्विधादरिद्राःदानशौंडंवदान्यमिवसुर्वेदान्यप्यूनलक्ष्यदानशौंडोबकूपदेस्समरःनयानीतयःविवेकि
नंविवेकवंतंपुरुषमिवगुणाविद्यादयःविनयंशिक्षामिवनैकदेशतःबकूनपदेभ्यःप्रापुर्लेभिरे॥४७॥ये
ष्टमितितेभक्तजनाःश्रितानामवनंरक्षणंतस्यविधानंकरणंतत्रतत्परंप्रसक्तंश्रेष्ठमतिप्रियम्तंश्रीहरिम्उ
त्फुल्लानिमेषवर्जितानिमेषव्यापाररहितानितथोन्फुल्लानितैःत्रनतएवतपोधिनैरिवतवासवद्भिरिवस्थितैःवसतेः
कल्लेरिक्तःलोचनैनेत्रैःचित्रेलेख्येनिर्मिताइवचित्रलिखिताइवनिश्चलाःस्थिराःसंतःपपुःसादरावलोकनंचक्रु
रिष्टमुत्फुल्लनिमेषवर्जितैर्लोचनैःपपुरुपोधितेरिव॥ तेश्रितावनविधानतत्परंनिश्चलास्तमिवचित्रनिर्मिताः
४८॥ वायुनांगमिवघर्मतापितंनीरधेरिवपयोनितांतहूता॥ क्षेमदेनसकलश्रमच्छिदात्तेनभक्तकुलमापसंमुदम्
४९॥ रित्यर्थःयथायोधितोनिदाघमयापयोःधिकंपिबतितद्वदतितृष्णयात्प्रधिकंमवलोकयन्तिसर्थः॥४८
वायुनेतिभक्तानांकुलंवृंदंसकलःसमग्रोयःश्रमःखेदोदुःखमितियावत् तंछिनत्तीतितथोक्तेनसकलदेह
हारिणेसर्थःक्षेमंकल्याणरक्षणंनिर्भयस्थानंतद्ददातीतितथोक्तेनतेनहरिणानिदाघेनतापेनतापितंपरितापितंसर्वांगंवायुनेवनीरधेःसमुद्रस्यपयोत्तरलंनिर्वाणान्तांतंडमसेवसंमुदं हर्षम् आपलेभे॥मालोपमेयं॥४९॥

तद्गुतिते भक्ताः ललितं रम्यं यत्केसरं तदादिर्येषां तानि तथोक्तानि तैः चंदनैः अतिवरैरतिरम्यैः कुसुमानां पुष्पा
णां हारैः तोरवैरैश्च महाधनैर्वस्त्रभूषणैरंबरैर्वस्त्रैः अतिसंभ्रमोत्थकुलादरस्तेन आकुला व्याप्ताः संतः तं श्रीहरिमर्चा
चयन् अपूजयन् ॥ ५० ॥ तेन्नामिति अन्वेक्षणे दत्तमेव चितो योगपस्तं तेन्नां नेपथ्यं प्रादधत् बिभ्रत् सः श्रीहरिः ॥
प्रसद्य प्रतिदिनम् मधुरया अमृतादप्यधिकमाधुर्ययुक्तयेसर्थः वाण्यैयावाण्या विधानैरर्थः अन्न चितैरतिसु

तैः वरैः कुसुमहारस्त्रोरवैरैर्मंडनैरतिवरैर्महाधनैः ॥ आर्चयंस्तमितिसंभ्रमाकुलाश्चंदनैर्ललितकेसरादिभिः ॥ ५० ॥
तेन्नामादधद्वेक्षणे चितंप्रसद्यसमुखयन्निजाश्रितान् ॥ वासरान्कतिचिदं चितेक्षणैर्वाण्यैयामधुरयात्वसद्गुत्रा
म् ॥ ५१ ॥ श्रृंगाररसतनुमानिवातिविलसन्निश्चंमहांतं रसोधार्मिस्तत्रसतानि धाय नितरामानंदयन्नुत्सवम् ॥ चंचच्चा
रुखलीनचंचलहयः प्राणान्निषण्णो हरौ श्रीमद्दुर्गपुरं धुतो धिर भसैस्तैरश्चवाणादिभिः ॥ ५२ ॥ हरेरीक्षणैर्भक्तो
परिदययावलोकनैः निजाश्रितान् निजभक्तजनान् भृशमसंतंस्करवयन् स्फरवं कुर्वन् सन् तत्करोतितदाचष्टे
इतिस्फरवयन् आश्रितानिच ॥ ततो ऽलरः ग्रात्रादेशः तत्रैतत्रैव कतिचित् कतिपयान् वासरान् दिवसान् ॥ अवसत ॥
वसतिस्म ॥ ५१ ॥ श्रृंगार इतितनुमान् मूर्तिमान् श्रृंगाररसस्तदाख्यो रसइव अतिविलसन् अतिराजमानः धार्मिः ॥२३॥

श्रीधर्मदेवपुत्रः सः श्रीहरिः तान् भक्तजनान् नितरामदभ्रं आनंदयन्सन् तत्रजीर्णदुर्गनगरे इत्थमुक्तप्रकारं म
हांतमनल्पं उत्सवं विधाय कृत्वा अधिरभसैस्तद्दीलावलोकनसंजाताधिकहर्षैरित्यर्थः तैः पूर्वोक्तैः अश्ववा
रादिभिः सादिप्रमुखैर्भक्तैः युतो युक्तः हरौहये निषण्णउपविष्टः चंचत् चलं चारुरम्यं यत् खलीनं कविकातेन
चंचलः हयः प्राणिर्यस्य सतथोक्तः सन् श्रीमत् स्वनिवासधामानित्रायत्रो ऽभावत् दुर्गपुरं प्रागात् ययौ त्राग
लविक्री डितवृत्तलक्षणं तूक्तं प्राक् ॥ ५२ ॥ इतिश्री पदवाक्यप्रमाणपारावारीणधुरीणविश्वनाथभट्टात्म

इतिश्रीहरिसंभवे महाकाव्ये दुर्गंकेश्रीमदचिंसानंदवर्णिकृते जीर्णदुर्गप्रयाणवर्णननामा षोडशः स
र्गः ॥ १६ ॥

जदीनानाथभट्टशिष्यश्रीप्रसक्षवाक्यदेवश्री सहजानंदस्वामिचरणकमलोपासकगोपालानं
दमुनंतः प्रेरितमतिव्यासादवटंकदयाशंकरात्मजश्रीहरिकृष्णैकभक्तभोलानाथकृतौ श्रीहरिसंभवकाव्य
स्यविद्वज्जनाह्लादिमाख्यायांव्याख्यायां षोडशः सर्गः ॥ १६ ॥ श्रीनीलकंठायहरिकृष्णायसहजानंदायनमः
लि॰ रावलजेरामोरारजी सवत् १९५६ नाफागणसुदी ११ एकादशीनेरविवासरेमेथाणग्रामेसमाप्ता ॥ ॥